# shrImahAlakShmIstotram from Vishnu Purana

# શ્રીમહાલક્ષ્મીસ્તોત્રમ્ વિષ્ણુપુરાણાન્તર્ગતમ્

## Document Information

Text title : mahAlakShmI stotram

File name : mahaalaxmiistotra.itx

Category : devii, lakShmI, stotra, devI

Location : doc_devii

Author : Traditional

Proofread by : Ravin Bhalekar ravibhalekar at hotmail.com, Karthik Raman karthik.raman at gmail.com

Description-comments : Shri Vishnupurana amsha 1, adhyAya 9, shloka 117-149, also Gita Press Book 1774 Devi StotraRatnakara

Latest update : July 08, 2004, November 14, 2018

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 17, 2023

*sanskritdocuments.org*

# શ્રીમહાલક્ષ્મીસ્તોત્રમ્ વિષ્ણુપુરાણાન્તર્ગતમ્

શ્રીગણેશાય નમઃ ।
શ્રીપરાશર ઉવાચ
સિંહાસનગતઃ શક્રસ્સમ્પ્રાપ્ય ત્રિદિવં પુનઃ ।
દેવરાજ્યે સ્થિતો દેવીં તુષ્ટાવાબ્જકરાં તતઃ ॥ ૧॥

ઇન્દ્ર ઉવાચ
નમસ્યે સર્વલોકાનાં જનનીમબ્જસમ્ભવામ્ । var સર્વભૂતાનાં
શ્રિયમુન્નિદ્રપદ્માક્ષીં વિષ્ણુવક્ષઃસ્થલસ્થિતામ્ ॥ ૨॥

પદ્માલયાં પદ્મકરાં પદ્મપત્રનિભેક્ષણામ્
વન્દે પદ્મમુખીં દેવીં પદ્મનાભપ્રિયામહમ્ ॥ ૩॥

ત્વં સિદ્ધિસ્ત્વં સ્વધા સ્વાહા સુધા ત્વં લોકપાવની ।
સન્ધ્યા રાત્રિઃ પ્રભા ભૂતિર્મેધા શ્રદ્ધા સરસ્વતી ॥ ૪॥

યજ્ઞવિદ્યા મહાવિદ્યા ગુહ્યવિદ્યા ચ શોભને ।
આત્મવિદ્યા ચ દેવિ ત્વં વિમુક્તિફલદાયિની ॥ ૫॥

આન્વીક્ષિકી ત્રયી વાર્તા દણ્ડનીતિસ્ત્વમેવ ચ ।
સૌમ્યાસૌમ્યૈર્જગદ્રૂપૈસ્ત્વયૈતદ્દેવિ પૂરિતમ્ ॥ ૬॥

કા ત્વન્યા ત્વામૃતે દેવિ સર્વયજ્ઞમયં વપુઃ ।
અધ્યાસ્તે દેવદેવસ્ય યોગચિન્ત્યં ગદાભૃતઃ ॥ ૭॥

ત્વયા દેવિ પરિત્યક્તં સકલં ભુવનત્રયમ્ ।
વિનષ્ટપ્રાયમભવત્ત્વયેદાનીં સમેધિતમ્ ॥ ૮॥

દારાઃ પુત્રાસ્તથાઽઽગારસુહૃદ્ધાન્યધનાદિકમ્ ।
ભવત્યેતન્મહાભાગે નિત્યં ત્વદ્વીક્ષણાન્નૃણામ્ ॥ ૯॥

શરીરારોગ્યમૈશ્વર્યમરિપક્ષક્ષયઃ સુખમ્ ।

દેવિ ત્વદ્દૃષ્ટિદૃષ્ટાનાં પુરુષાણાં ન દુર્લભમ્ ॥ ૧૦॥

ત્વમમ્બા સર્વભૂતાનાં દેવદેવો હરિઃ પિતા । var ત્વં માતા સર્વલોકાનાં
ત્વયૈતદ્વિષ્ણુના ચામ્બ જગદ્વ્યાપ્તં ચરાચરમ્ ॥ ૧૧॥

મા નઃ કોશસ્તથા ગોષ્ઠં મા ગૃહં મા પરિચ્છદમ્ ।
મા શરીરં કલત્રં ચ ત્યજેથાઃ સર્વપાવનિ ॥ ૧૨॥

મા પુત્રાન્મા સુહૃદ્વર્ગાન્મા પશૂન્મા વિભૂષણમ્ ।
ત્યજેથા મમ દેવસ્ય વિષ્ણોર્વક્ષઃસ્થલાશ્રયે ॥ ૧૩॥

સત્ત્વેન સત્યશૌચાભ્યાં તથા શીલાદિભિર્ગુણૈઃ ।
ત્યજ્યન્તે તે નરાઃ સદ્યઃ સન્ત્યક્તા યે ત્વયાઽમલે ॥ ૧૪॥

ત્વયાઽવલોકિતાઃ સદ્યઃ શીલાદ્યૈરખિલૈર્ગુણૈઃ ।
કુલૈશ્વર્યૈશ્ચ પૂજ્યન્તે પુરુષા નિર્ગુણા અપિ ॥ ૧૫॥

સ શ્લાઘ્યઃ સ ગુણી ધન્યઃ સ કુલીનઃ સ બુદ્ધિમાન્ ।
સ શૂરઃ સ ચ વિક્રાન્તો યસ્ત્વયા દેવિ વીક્ષિતઃ ॥ ૧૬॥

સદ્યો વૈગુણ્યમાયાન્તિ શીલાદ્યાઃ સકલા ગુણાઃ ।
પરાઙ્ગમુખી જગદ્ધાત્રી યસ્ય ત્વં વિષ્ણુવલ્લભે ॥ ૧૭॥

ન તે વર્ણયિતું શક્તા ગુણાઞ્જિહ્વાઽપિ વેધસઃ ।
પ્રસીદ દેવિ પદ્માક્ષિ માઽસ્માંસ્ત્યાક્ષીઃ કદાચન ॥ ૧૮॥

શ્રીપરાશર ઉવાચ
એવં શ્રીઃ સંસ્તુતા સમ્યક્ પ્રાહ હૃષ્ટા શતક્રતુમ્ ।
શ ૃણ્વતાં સર્વદેવાનાં સર્વભૂતસ્થિતા દ્વિજ ॥ ૧૯॥

શ્રીરુવાચ
પરિતુષ્ટાસ્મિ દેવેશ સ્તોત્રેણાનેન તે હરે ।
વરં વૃણીષ્વ યસ્ત્વિષ્ટો વરદાઽહં તવાગતા ॥ ૨૦॥

ઇન્દ્ર ઉવાચ
વરદા યદિમેદેવિ વરાર્હો યદિ વાઽપ્યહમ્ ।
ત્રૈલોક્યં ન ત્વયા ત્યાજ્યમેષ મેઽસ્તુ વરઃ પરઃ ॥ ૨૧॥

સ્તોત્રેણ યસ્તથૈતેન ત્વાં સ્તોષ્યત્યબ્ધિસમ્ભવે ।
સ ત્વયા ન પરિત્યાજ્યો દ્વિતીયોઽસ્તુ વરો મમ ॥ ૨૨॥

શ્રીરુવાચ
ત્રૈલોક્યં ત્રિદશશ્રેષ્ઠ ન સન્ત્યક્ષ્યામિ વાસવ ।
દત્તો વરો મયાઽયં તે સ્તોત્રારાધનતુષ્ટયા ॥ ૨૩॥

યશ્ચ સાયં તથા પ્રાતઃ સ્તોત્રેણાનેન માનવઃ ।
સ્તોષ્યતે ચેન્ન તસ્યાહં ભવિષ્યામિ પરાઙ્ગ્મુખી ॥ ૨૪॥

શ્રીપારાશર ઉવાચ
એવં વરં દદૌ દેવી દેવરાજાય વૈ પુરા ।
મૈત્રેય શ્રીર્મહાભાગા સ્તોત્રારાધનતોષિતા ॥ ૨૫॥

ભૃગોઃ ખ્યાત્યાં સમુત્પન્ના શ્રીઃ પૂર્વમુદધેઃ પુનઃ ।
દેવદાનવયત્નેન પ્રસૂતાઽમૃતમન્થને ॥ ૨૬॥

એવં યદા જગત્સ્વામી દેવરાજો જનાર્દનઃ ।
અવતારઃ કરોત્યેષા તદા શ્રીસ્તત્સહાયિની ॥ ૨૭॥

પુનશ્ચપદ્મા સમ્ભૂતા યદાઽદિત્યોઽભવદ્ધરિઃ ।
યદા ચ ભાર્ગવો રામસ્તદાભૂદ્ધરણીત્વિયમ્ ॥ ૨૮॥

રાઘવત્વેઽભવત્સીતા રુક્મિણી કૃષ્ણજન્મનિ ।
અન્યેષુ ચાવતારેષુ વિષ્ણોરેખાઽનપાયિની ॥ ૨૯॥

દેવત્વે દેવદેહેયં માનુષત્વે ચ માનુષી ।
વિષ્ણોર્દેહાનુરુપાં વૈ કરોત્યેષાઽઽત્મનસ્તનુમ્ ॥ ૩૦॥

યશ્ચૈતશ◌ૃણુયાજ્જન્મ લક્ષ્મ્યા યશ્ચ પઠેન્નરઃ ।
શ્રિયો ન વિચ્યુતિસ્તસ્ય ગૃહે યાવત્કુલત્રયમ્ ॥ ૩૧॥

પઠ્યતે યેષુ ચૈવર્ષે ગૃહેષુ શ્રીસ્તવં મુને ।
અલક્ષ્મીઃ કલહાધારા ન તેષ્વાસ્તે કદાચન ॥ ૩૨॥

એતત્તે કથિતં બ્રહ્મન્યન્માં ત્વં પરિપૃચ્છસિ ।
ક્ષીરાબ્ધૌ શ્રીર્યથા જાતા પૂર્વં ભૃગુસુતા સતી ॥ ૩૩॥

ઇતિ સકલવિભૂત્યવાપ્તિહેતુઃ સ્તુતિરિયમિન્દ્રમુખોદ્ગતા હિ લક્ષ્મ્યાઃ ।
અનુદિનમિહ પઠ્યતે નૃભિર્યૈર્વસતિ ન તેષુ કદાચિદપ્યલક્ષ્મીઃ ॥ ૩૪॥

॥ ઇતિ શ્રીવિષ્ણુપુરાણે મહાલક્ષ્મી સ્તોત્રં સમ્પૂર્ણમ્ ॥

Shri Vishnupurana amsha 1, adhyAya 9, 117-149

Proofread by Ravin Bhalekar ravibhalekar at hotmail.com and
Karthik Raman karthik.raman at gmail.com

---

*shrImahAlakShmIstotram from Vishnu Purana*
pdf was typeset on September 17, 2023

Please send corrections to *sanskrit@cheerful.com*